**दिनाङ्क :- 04.07.2025**

**प्रात: - 06:55**

**<u>प्रधानमन्त्री-त्रिनिदाद्-टोबैगो</u>**

प्रधानमन्त्री नरेन्द्रमोदी अब्रवीत् यत् त्रिनिदाद्-टोबैगो-देशे भारतीयसमुदायस्य यात्रा साहसस्य विषय: अस्ति इति। अद्य प्रातः त्रिनिदाद्-टोबैगो-देशयोः भारतीयसमुदायस्य कार्यक्रमम् संबोधयन् श्रीमोदी अवोचत् यत् तेषां पूर्वजाः आशाया: साकं कठोरतां सम्मुखीकृतवन्तः, हृदयेषु रामायणं च वहन्ति स्म इति। सः अवदत् यत् ते न केवलं प्रवासिनः अपितु कालातीतसंस्कृतेः दूताः च सन्ति इति।

प्रधानमन्त्री नरेन्द्रमोदी पञ्चराष्ट्राणां यात्रायाः द्वितीये चरणे त्रिनिदाद्-टोबैगो-देशं प्रति अगच्छत्।

विमानस्थानकं प्राप्य प्रधानमन्त्रिणः त्रिनिदाद्-टोबैगो-देशस्य प्रधानमन्त्रिणा कमला पर्साद्-बिस्सेसर् इत्यनया सह तस्याः मन्त्रिमण्डलस्य सदस्यैः, अन्यैः महानुभावैः च विशेष-रूपेण स्वागतम् कृतम्। प्रधानमन्त्रिणं औपचारिक-रक्षक-सम्मानं प्रदत्तम्, विशेष-सांस्कृतिक-प्रदर्शनेन च स्वागतम् अभवत्। एकस्मिन् जन संचार माध्यमेन श्रीमोदी अवोचत् यत् भारतात् बहवः जनाः बहुभ्यः वर्षेभ्यः पूर्वं त्रिनिदाद्-टोबैगो-देशं प्रति आगच्छन् इति। वर्षेषु ते अनेकेषु क्षेत्रेषु विशिष्टतां प्राप्तवन्तः, राष्ट्रस्य विकासयात्रां समृद्धं च कुर्वन्तः सन्ति। अवधेयं यत् भारतीय प्रधानमन्त्रित्वेन त्रिनिदाद्-टोबैगो देशं प्रति प्रथमा यात्रा वर्तते।

**<u>प्रधानमन्त्री-घाना</u>**

प्रधानमन्त्री श्रीनरेन्द्रमोदी घानादेशस्य संसदं सम्बोधयन् अवदत् यत् घानादेशः लोकतन्त्रस्य भावनां विकीर्णां करोति, यत्र हि, घानादेशे भवितुं, सम्माननीयं संसदं च सम्बोधयितुं सः अतीव गौरवम् अनुभवति ।

सः अवदत्, घानादेशः न केवलं तस्य मृत्तिकायां सुवर्णः अस्तीति, सुवर्णभूमिः इति प्रसिद्धः, अपि तु तस्य जनानां तेजसः बलस्य च कारणेन सः सुवर्णभूमिः कथ्यते। ततः पूर्वं प्रधानमन्त्री मोदी, अथ घानादेशस्य राष्ट्रपतिः जॉन् द्रमणिमहामा च प्रतिनिधिमण्डलस्तरस्य वार्तां कृतवन्तौ, ततः राष्ट्रद्वयं व्यापक-सहयोग-रूपेण स्वसम्बन्धस्य उन्नतीकरणाय सहमतम् अभवत्। उभौ नेतारौ घानादेशे वर्धमानस्य द्विपक्षीयव्यापारस्य भारतीयनिवेशस्य च स्वागतं कृतवन्तौ, रक्षासुरक्षासहकार्यस्य विषये अपि उक्तवन्तौ।

## पीएम- अर्जेण्टीना

वैश्विक-दक्षिणेन सह भारतस्य सम्बन्धं सुदृढं कर्तुं स्वस्य पञ्चराष्ट्रयात्रायाः अग्रिम-चरणे, प्रधानमन्त्री नरेन्द्रमोदी राष्ट्रपतिना जेवियर् मिले इत्यस्य आमन्त्रणेन अर्जेण्टीना-देशं यास्यति । जुलाई -मासस्य चतु: पंच दिनाङ्कयो: आयोजितेषु कार्यक्रमेषु सप्तपंचाशत् वर्षाणाम् अनन्तरं भारतीयप्रधानमन्त्रिणः अर्जेण्टीना-देशस्य प्रथमा द्वैपाक्षिकयात्रा भविष्यति।

## दिल्ली-सी. ए. क्यू. एम्.

दिल्ली-सर्वकारेण (सी. ए. क्यू. एम्.) इति वायु-गुणवत्ता-प्रबन्धन-आयोगाय निवेदनं कृतम् यत् देहल्यां -वाहनानां कृते इन्धनस्य निराकरणानिवार्यतया प्रवर्तनं भवेत् इति। देहल्या: पर्यावरण मंत्री मञ्जिन्दर् सिङ्घ् सिर्सा वर्यः अस्मिन् विषये सी. ए. क्यू. एम्. इत्यस्मै पत्रं लिखितवान् अस्ति।

## दूरदर्शन-मूल्याङ्कन

सूचना-प्रसारण-मन्त्रालयेन चतुर्दशाधिक द्विसहस्र तमे वर्षे मूलतः निर्गमितानां दूरदर्शन-मूल्याङ्कन-संस्थानां नीति-मार्गदर्शिकासु संशोधनानां प्रस्तावः कृतः । प्रस्तावित-प्रारूपेण प्रसारमाध्यमानां कृते कानिचन प्रतिबन्धात्मक-उपबन्धा: निरस्तिकृता: येन आधुनिकीकरणं भवेत्। प्रस्तावित- परिष्काराणाम् उद्देश्यं, टी. आर्. पी.- व्यवस्थायां विविध विकास: भवेत् इति सुनिश्चितं कर्तुं अपि अस्ति।